# Shri Parvatavardhini Sahasranama Stotram

# શ્રીપર્વતવર્ધિનીસહસ્રનામસ્તોત્રમ્

## Document Information

Text title : Parvatavardhini Sahasranama Stotram

File name : parvatavardhinIsahasranAmastotram.itx

Category : devii, sahasranAma

Location : doc_devii

Transliterated by : Sivakumar Thyagarajan

Proofread by : Sivakumar Thyagarajan, Rajani Arjun Shankar

Description-comments : See corresponding Namavali

Latest update : June 12, 2023

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 29, 2023

*sanskritdocuments.org*

# શ્રીપર્વતવર્ધિનીસહસ્રનામસ્તોત્રમ્

ૐ શ્રીગણેશાય નમઃ ।

હરિઃ ૐ ।

ઋષયઃ -

સૂત શ્રુતાનિ બહુશઃ પુણ્યતીર્થાનિ તે મુખાત્ ।
શિવશક્તિ- રમાવિષ્ણુ-તુષ્ટાનિ પૃથિવી-તલે ॥ ૧॥

તત્ર સેતુ-પ્રશંસાયાં યદુક્તં ભવતા પુરા ।
નામ્નાં સહસ્રં દિવ્યાનાં ચિન્તિતાર્થૈક-સાધનમ્ ॥ ૨॥

મૈત્રાવરુણિના પ્રોક્તં રાઘવાય મહાત્મને ।
તદ્વયં શ્રોતુમિચ્છામો વિસ્તરેણ યથાતથમ્ ॥ ૩॥

બ્રૂહિ નઃ શ્રદ્દધાનાનાં તત્ફલઞ્ચાપિ યાદૃશમ્ ।
સાધુ પૃષ્ટં મહાભાગાઃ કથયામ્યથ વિસ્તરાત્ ॥ ૪॥

નામ્નાં સહસ્રં દિવ્યાનાં કુમ્ભજેન યથોદિતમ્ ।
દેવ્યાઃ પર્વતવર્ધિન્યાઃ રામાયાદ્ભુતકર્મણે ॥ ૫॥

ફલં તસ્ય ચ વક્ષ્યામિ શ ૃણુધ્વં મુનિપુઙ્ગવાઃ ।
પૂર્વં સંસ્થાપ્ય રામેશમર્ચયિત્વા યથાવિધિ ॥ ૬॥

તસ્ય દક્ષિણપાર્શ્વે ચ દેવીં પર્વતવર્ધિનીમ્ ।
વરાભય-કરામ્ભોજાં પદ્મકૈરવ-ધારિણીમ્ ॥ ૭॥

ચક્રરાજોપરિ સ્થાપ્યાં મહાદેવીં મનોન્મનીમ્ ।
પરિવાર-સમાયુક્તાં પઞ્ચાવરણ-મધ્યગામ્ ॥ ૮॥

અગસ્ત્ય-પ્રોક્તવિધિના યથાશાસ્ત્રમપૂજયત્ ।
સર્વોપચારૈસ્સમ્પૂજ્ય દેવીં પર્વતવર્ધિનીમ્ ॥ ૯॥

સસીતાલક્ષ્મણો રામઃ કુમ્ભજઞ્ચેદમબ્રવીત્ ।

બ્રહ્મન્ નામ-સહસ્રેણ સુવર્ણકમલૈરહમ્ ॥ ૧૦॥

પૂજયિષ્યેઽઘશાન્ત્યર્થં દેવીં પર્વતવર્ધિનીમ્ ।
તં મહ્યં શ્રદ્દધાનાય બ્રૂહિ નામસહસ્રકમ્ ॥ ૧૧॥

રામેશ-વલ્લભા યેન તુષ્ટા ભવતિ પૂજિતા ।
શ્રીસૂતઃ -
તત્તસ્ય વચનં શ્રુત્વા સન્તુષ્ટઃ કુમ્ભજો મુનિઃ ॥ ૧૨॥

દેવ્યા નામ-સહસ્રં તુ શમ્ભોર્લબ્ધમુવાચ તમ્ ।
અગસ્ત્યઃ -
પરં ગુહ્યમિદં નામ-સહસમઘનાશનમ્ ॥ ૧૩॥

ચિન્તિતાર્થપ્રદં દેવી-સાક્ષાત્કારકરન્નૃણામ્ ।
વક્ષ્યે રાઘવ તે ભક્ત્યા લોકોપકૃતયે તથા ॥ ૧૪॥

અનેનાર્ચય રામેશ-વલ્લભાં ત્વં મનોન્મનીમ્ ।
તત્પ્રસાદાદ્દાશરથે સર્વાન્ કામાનવાપ્સ્યસિ ॥ ૧૫॥

એતન્નામસહસ્રં મે પુરા પ્રોવાચ શઙ્કરઃ ।
શ્રીસૂતઃ -
એવમુક્ત્વા દાશરથિં કુમ્ભયોનિર્મહાતપાઃ ॥ ૧૬॥

નામ્નાં સહસ્રં રામાય સાક્ષાદુપદિદેશ હ ।
લબ્ધોપદેશો રામોઽથ યદાનર્ચ મહેશ્વરીમ્ ॥ ૧૭॥

પ્રીતા ચ દેવી રામાય વરાન્યાન્ પ્રદદૌ શુભાન્ ।
એતન્નામ-સહસ્રસ્ય દેવ્યુક્તં પાઠજં ફલમ્ ॥ ૧૮॥

તદહં વઃ પ્રવક્ષ્યામિ શ‍ૃણુતાવ્યગ્ર-માનસાઃ ।
આનીય હેમપદ્માનિ હેમપાત્રે નિધાય ચ ॥ ૧૯॥

સીતયા સહિતો રામઃ ઉપવિશ્યાસને શુચિઃ ।
પ્રાણાયામાદિકં કૃત્વા કુમ્ભયોન્યુપદેશવત્ ॥ ૨૦॥

ચતુર્થ્યન્તૈર્નામપદૈશ્ચક્રેઽમ્બા-પાદુકાર્ચનમ્ ।
શ્રીરામઃ -
ૐ અજાઽવ્યયાઽનાદિ-બોધાઽનેક-રૂપાઽગ્નિહોત્રિણી ॥ ૨૧॥

અચિન્ત્ય-વિભવાઽનન્ત-ગુણદાઽઘ-વિનાશિની ।

અતિસૂક્ષ્મ-ધિયાઽઽરાધ્યાઽણિમાદ્યષ્ટ-પ્રદાયિની ॥ ૨૨॥

અળિપ્રિયાઽલિકનેત્રા-ઽમૃતવાગદ્રિકન્યકા ।
અર્ધચન્દ્ર-ધરાઽર્ધેશા-ઽમોઘપાદનિષેવણા ॥ ૨૩॥

અર્થિતાઽર્થિ-જનારાધ્યા-ઽવ્યક્તાર્થૈક-પ્રકાશિકા ।
અહર્પતિ-નિશાનાથ-જાતવેદ-વિલોચના ॥ ૨૪॥

અશ્વારૂઢાઽશ્વિનીપુત્ર-વૈદ્યવિદ્યા-પ્રદાયિની ।
અગધન્વિ-પ્રિયાઽનઙ્ગ-સઞ્જીવનમહૌષધી ॥ ૨૫॥

અલક્ષ્મીનાશદા-ઽઽલક્ષ્યાવયવા-ઽસુરમર્દિની ।
અજરામર-સિદ્ધૌઘ-નિષેવિત-પદામ્બુજા ॥ ૨૬॥

અટવીવાસ-સન્યાસિ-તાપસાનન્દ-દાયિની ।
અથર્વશિરસિ ખ્યાતા-ઽપવર્ગ-ફલદાયિની ॥ ૨૭॥

અમરી-વૃન્દ-વન્દ્યાઙ્ઘ્રિ-રયદાઽરણ્ય-વાસિની ।
અહન્તાદિ-પ્રપઞ્ચૈક-હેતુભૂતાઽઽદિરાત્મિકા ॥ ૨૮॥

અખિલાગમ-વેદોક્ત-મન્ત્ર-સિદ્ધિપ્રદાયિની ।
અજેયાઽસુરવૃન્દાનામમેયાઽનિયતાત્મભિઃ ॥ ૨૯॥

અકળઙ્ક-કલાનાથ-પૂર્ણબિમ્બ-સમાનના ।
આદિરૂપાઽઽકાશવાસિ-પ્રિયા-ઽઽદિનિધનાતિગા ॥ ૩૦॥

આત્મારામ-જનારાધ્યા-ઽઽદિત્ય-કોટિસમપ્રભા ।
આચારચતુરાઽઽચાર્ય-મુખજ્ઞેય-સ્વરૂપિણી ॥ ૩૧॥

આજિ-ગમ્ભીરનિનદ-ચ્છિન્ન-દૈત્ય-શિરોધરા ।
આતઙ્કવર્જિતા-ઽઽદેયાઽઽદિત્યાદિ-ગણસૌખ્યદા ॥ ૩૨॥

આધારભૂતા જગતામાધિવ્યાધિ-વિનાશિની ।
આનન્દનિલયાઽઽનન્દવર્ધિન્યાનન્દ-દાયિની ॥ ૩૩॥

આપ્યાયિન્યાપદાં હન્ત્રી નિત્યાકાશ-નિવાસિની ।
આદિક્ષાન્તાક્ષરમયી સર્વામય-વિનાશિની ॥ ૩૪॥

આયતાઽઽરામ-નિલયા શયિતા ચાસવપ્રિયા ।
આદિનાથપ્રિયાઽઽકાર-રહિતા-ઽઽકારદાયિની ॥ ૩૫॥

આશાપાશક્લેશહરાઽઽહુતિરૂપા-ઽધ્વરિક્રિયા ।
આહારરાત્રિર્જગતામાયુર્દા-ઽઽરમ્ભ-સિદ્ધિદા ॥ ૩૬॥

આસનસ્થાઽઽત્મા જગદામયજાત-નિવારિણી ।
ઇચ્છાશક્તિપ્રદેયત્તા-રહિતેષુ-શરાસના ॥ ૩૭॥

ઇતિહાસપુરાણાર્થ-વક્ત્રી ષડસિતાનના ।
ઇળેડા-પિઙ્ગળાનાડી વાયુસઞ્ચાર-દાયિની ॥ ૩૮॥

ઇતિહ-યોગત્રયાઽગ્નિ-વાસિની જ્યાસ્વરૂપિણી ।
ઇન્દુખણ્ડ-ધરેષ્વાસા વિધ્યેશત્વાદિમન્ત્રિણી ॥ ૩૯॥

ઇશિરાહારદેચ્છેષુરિષુમત્કરપઙ્કજા ।
ઈશ્વરાર્ધતનૂરીશા શશ્વદીશિત્વદાયિની ॥ ૪૦॥

ઈડિતેશાન-પઞ્ચાસ્યૈરીતિ-ભીતિ-નિવારિણી ।
ઉન્મેષ-બુધભા-દીપ્તિરુદ્યદાદિત્ય-રૂપિણી
ઉક્તા ચોદ્ધતદૈતેયા પ્રોદ્ગીતા સુરકિન્નરૈઃ ।
ઉદ્ગીર્ણેક્ષુધનુઃપુષ્પબાણ-પાશાઙ્કુશાયુધા ॥ ૪૧॥

ઉદ્ઘાત-શમની ચેહામુત્ર-ભાગ્યપ્રદાયિની ।
ઉમાઽદની મહાપાનમુચ્છિષ્ટ-ગણપાર્ચિતા ॥ ૪૨॥

ઉદ્ધતોચ્છિષ્ટા માતઙ્ગી તથૈવોચ્છિન્નકન્દકા ।
ઉડ્ડામર-મહામન્ત્રરૂપિણ્યુદ્દણ્ડ-શૂલિની ॥ ૪૩॥

ઉત્થિતારાતિ-શમની ચોદ્દણ્ડાસુરમર્દિની ।
ઉત્તારિણી ભવામ્ભોધેરુત્તમાઙ્ઘ્રિ-નિષેવણા ॥ ૪૪॥

ઉન્નતોરોજ-કલશોદ્ધૃત-બ્રહ્માણ્ડ-ગોળકા ।
ઉપાંશુ-મન્ત્રફલદાઽભ્યુપજીવ્યાઽન્યદૈવતૈઃ ॥ ૪૫॥

ઉપમા-રહિતોદ્ભૂતિ-સ્થિતિસંહાર-કારિણી ।
ઉન્મન્યવસ્થા-વિજ્ઞેયોત્તમ-વીર-નિષેવિતા ॥ ૪૬॥

ઉરસ્સરોપવીતાર્ઘ્યોરરીકૃત-સુખપ્રદા ।
ઉલ્લાસિન્યુલ્લસદ્વક્ત્રોલ્લૂન-પાપમહાદ્રુમા ॥ ૪૭॥

ઉદ્ભાસિતારિ-ભવનોદ્વેલામૃત-મહોદધિઃ ।
ઉત્તંસવાદ્ય-સન્તુષ્ટા વેગદુઃખ-નિવારિણી ॥ ૪૮॥

ઉચ્ચૈઃષડાસનગતોષત્કાલાદિત્ય-સન્નિભા ।
ઉત્ક્ષેપણાદિ-કર્મણોક્ષવાહ-મનોરમા ॥ ૪૯॥

ઊર્ધ્વકેશ્યૂર્ધ્વગતિદોર્જસ્વલોર્મિ-વિવર્જિતા ।
ઊનીકૃત-સુરારાતિરૂર્ધ્વકાય-મનુપ્રિયા ॥ ૫૦॥

ઋણમોક્ષપ્રદા ઋદ્ધિઃ ઋગ્વેદોક્ત-સ્વરૂપિણી ।
ઋતવાક્યપ્રિયા ઋદ્ધા ઋષિસેવ્યર્ષિમોક્ષદા ॥ ૫૧॥

એધિન્યેકાક્ષર-મનુઃ એકીકૃતમહેશ્વરા ।
એજિતાશેષદેવારિઃ એતાવત્તા-વિવર્જિતા ॥ ૫૨॥

એનોરાશિ-પ્રશમની એકામ્ર-તરુમૂલકા ।
ઐહિકામુષ્મિક-ફલ-પ્રદાત્ર્યૈશ્વર્ય-વર્ધિની ॥ ૫૩॥

ઐન્દવાર્ધ-ધરૈશાન-ગુણવર્ણન-તત્પરા ।
ઐરાવત-સમારૂઢ-દેવરાજ-નમસ્કૃતા ॥ ૫૪॥

ઐન્દ્રૈળબિલ-સૌભાગ્ય-દાયિન્યૈઙ્કાર-મન્ત્રિણી ।
ઓઙ્કારાદિચતુર્વેદ-વિદ્યૌષધિપતિ-પ્રભા ॥ ૫૫॥

ઓજસ્વિન્યોજસાં રાશિરોતસર્વપ્રપઞ્ચની ।
ઓઘપ્રદૌઘતટિની ચોઙ્કારસ્વસ્વરૂપિણી ॥ ૫૬॥

ઔષધં ભવરોગસ્યૌત્તાનપાદિ-પદપ્રદા ।
ઔન્નત્યહન્ત્રી દૈત્યાનામૌદ્ભિજ્જાદિ-ચતુર્વિધા ॥ ૫૭॥

ઔપાસનાદિ-સોમાન્તં બ્રહ્મકર્મ-પ્રવર્તિની ।
અન્નપૂર્ણાઽમ્બિકાઽમ્બાલી ચામ્બરાન્તરચારિણી ॥ ૫૮॥

અઙ્કુરૂપાઽઙ્કુ-સંવિષ્ટ-ષડાનન-ગજાનના ।
અઙ્ગણાન્તર-સઞ્ચારિ-સિદ્ધદેવર્ષિ-સેવિતા ॥ ૫૯॥

અઙ્ગલિપ્તાષ્ટગન્ધાઽઙ્ગતુષ્ટિપુષ્ટિ-વિધાયિની ।
અઙ્ગનાઽઘાર્તિશમની દયાઽઙ્ગારકભીતિહા ॥ ૬૦॥

અન્તઃપુરં મહેશસ્ય ચાન્તઃકરણચેતના ।
અન્ધકાસુર-સંહર્ત્રી ચણ્ડાકાર-વિનાશિની ॥ ૬૧॥

અમ્ભોજનયનાઽમ્ભોજસમ્ભવાદિ-પ્રબોધદા ।
અંસાસક્ત-ધનુર્બાણાઽંશુમત્કોટિ-પ્રકાશિની ॥ ૬૨॥

અક્ષમાલાઙ્કુશધરાઽક્ષરમાલા-સ્વરૂપિણી ।
અક્ષક્રીડા-પરાઽસ્તીતિવાદિની યાચકાઞ્જનાન્ ॥ ૬૩॥

કચન્યસ્ત-નિશાનાથ-શકલા કચ્છપાકૃતિઃ ।
કનકામ્બર-સંવીત-તનુઃ કનકપાદુકા ॥ ૬૪॥

કબરી-ભાર-વિન્યસ્ત-કલ્પદ્રુમ-સુમાલિકા ।
કમલાકાર-નયના કઠોર-કુચમણ્ડલા ॥ ૬૫॥

કમ્બુકણ્ઠી કર્મસિદ્ધિ-જનની કમલાપ્રદા ।
કટીતટ-ક્વણત્કાઞ્ચિ-કિઙ્કિણી-દામ-મણ્ડિતા ॥ ૬૬॥

કલહંસરવા કદ્રૂસુત-નાથોપવીતિની ।
કદળીકાણ્ડ-ચારૂરુઃ કરકઙ્કણ-નિસ્વના ॥ ૬૭॥

કલ્યાણકારિણી કામદાયિની કર્મસિદ્ધિદા ।
કાલકાલપ્રિયા કાળી કાળાઞ્જન-સમપ્રભા ॥ ૬૮॥

કાસાર-ક્રીડન-પરા કાણાદ-મત-કોવિદા ।
કાયાતીતા કિશોરેન્દુ-શેખરા કીરધારિણી ॥ ૬૯॥

કલ્મષઘ્ની કુલાચારપ્રિયા કુણ્ડલિનીક્રિયા ।
કુમારી કુણ્ડલામૃષ્ટ-ગણ્ડા કુહરિણી કુહૂ ॥ ૭૦॥

કુલસુન્દરિકા નિત્યા કુણ્ડાગ્નિ-હુતહર્ષિણી ।
કરુણાપૂર્ણહૃદયા કુઞ્જરાનન-વર્ધિની ॥ ૭૧॥

કુમારજનની કુન્દધારિણી કુઞ્ચિતાવિકા ।
કર્પૂરલવણી કૂજત્-કોકિલોદ્યાન-વાસિની ॥ ૭૨॥

કૂર્માધારા કુરુક્ષેત્રવાસિની કાઞ્ચનપ્રદા ।
કુન્દાગ્ર-દશનાકારા કુઞ્ચિતાગ્ર-શિરોરુહા ॥ ૭૩॥

કલ્હારકુમુદામોદા કેકિપિઞ્છ-વિરાજિતા ।
ક્રૂરદૈત્ય-પ્રશમની ક્રોધલોભ-વિવર્જિતા ॥ ૭૪॥

કૃશોદરી કૃપાવતી ક્લેશનાશ-વિધાયિની ।
ક્લિન્ના ક્લેશ-હરા ક્લુપ્તિઃ કુહરાન્તર-ચારિણી ॥ ૭૫॥

કુણ્ઠીકૃતસુરારાતિઃ કુક્ષિન્યસ્તજગત્રયા ।

ખડ્ગિની ખેટકધરા ખાદિતામર-વૈરિણી ॥ ૭૬॥

ખવાસા ખપુરાહારા ખેદ-પીડા-નિવારિણી ।
ખદ્યોત-કોટિરુચિરા ખદ્યોતાન્વય-દેવતા ॥ ૭૭॥

વિદ્વત્સાધુ-કૃતાનન્દા ખણ્ડિતાશેષ-પાતકા ।
ખગેશ-વાહ-સહજા ખલપિત્તાતિદૂરગા ॥ ૭૮॥

ગજાસ્ય-જનની ગદ્યપદ્ય-વિદ્યા-વિનોદિની ।
ગદાબાધ-પરિધ્વંસ-હેતુ-પાદનિષેવણા ॥ ૭૯॥

ગદિતા ગણગન્ધર્વ-સિદ્ધવિદ્યાધરૈસ્તથા ।
ગર્ભવાસ-ક્લમ-હરા ગરવેગ-નિવારિણી ॥ ૮૦॥

ગળદ્યાવક-પાદાબ્જા ગગનામ્બર-કામિની ।
ગર્જદ્ઘન-સમારાવા ગહનાવાસ-સેવિતા ॥ ૮૧॥

ગાનપ્રિયા ગારુડિની ગાઙ્ગતોયાર્દ્ર-મૂર્ધજા ।
ગાન્ધર્વ-શાસ્ત્રનિપુણા ગર્વિતાસુર-ઘાતકા ॥ ૮૨॥

ગાલવારાધિત-પદા ગિરિજા ગિળિતાસુરા ।
ગીર્ગિરીશપ્રિયા ગૌરી-ગુરુજ્ઞેયા ગુહાશયા ॥ ૮૩॥

ગુહ્યા ગુહાવાસનુતા ગુપ્તા વિશ્વગુણાત્મિકા ।
ગુપ્ત-ત્રયાતીત-રૂપા ગૂઢતત્ત્વા ગુહાર્ચિતા ॥ ૮૪॥

ગેયા ગૈરિક-સઙ્કાશા ગોપ્ત્રી ગોક્ષીર-સન્નિભા ।
ગોવાહના ગોપસુતા ગોવિન્દાગ્ર-સમુદ્ભવા ॥ ૮૫॥

ગોમતી ગોધરાગારા ગોકર્ણ-કૃતભૂષણા ।
ગૌરી ગમ્ભીર-નિનદા ગૌડવિન્ધ્યાશયા ગુહા ॥ ૮૬॥

ગોદાવરી ગદહરા ગૃહીત-પરમાયુધા ।
ગ્રામણાગ્રા સદાગ્રાહ્યા ગન્ધમાદન-વાસિની ॥ ૮૭॥

ગાઢદુઃખહરા ગણ્ડ-પત્રવલ્લી-લસન્મુખા ।
ઘનવૃષ્ટિપ્રદા ઘોરા ઘર્મરશ્મિર્ઘનાઘના ॥ ૮૮॥

ઘોરગૃહા સદુદ્ઘર્ષાવાસા ઘોષસુખપ્રદા ।
ઘણ્ટાલસત્કરામ્ભોજા ઘુટિકાસિદ્ધિ-દાયિની ॥ ૮૯॥

ઘૃષ્ટચન્દન-લિપ્તાઙ્ગી ઘટાકાર-પયોધરા ।
ઘટિતાશેષ-ભુવના ઘાતિની સુરવિદ્વિષામ્ ॥ ૯૦॥

ચતુર્વેદ-વચોવેદ્યા ચતુર્વર્ગફલપ્રદા ।
ચક્રરાજાન્તર-ગતા ચક્રચર્યા ચતુર્વિધા ॥ ૯૧॥

ચતુર્મુખનુતાઽનેક-ચરિતા ચર્વણ-પ્રિયા ।
ચષકાઽઙ્કિત-હસ્તાબ્જા ચરમા ચલકુણ્ડલા ॥ ૯૨॥

ચર્મામ્બરપ્રિયા ચણ્ડી ચણ્ડભૈરવ-સેવિતા ।
ચન્દ્રમણ્ડલ-મધ્યસ્થા ચણ્ડમારુત-વેગિની ॥ ૯૩॥

ચઞ્ચરીકાઢ્ય-ધમ્મિલ્લા ચમ્પક-સ્રગલઙ્કૃતા ।
ચન્દનાગરુ-સૌગન્ધ્યા ચઞ્ચચ્ચામીકરામ્બરા ॥ ૯૪॥

ચણ્ડમુણ્ડશિરોહન્ત્રી ચતુષ્પથ-નિવાસિની ।
ચતુઃપીઠાન્તરાસીના ચતુરા ચતુરાયુધા ॥ ૯૫॥

ચાર્વઙ્ગી ચારુવદના ચાટુ-શઙ્કરભાષિણી ।
ચામ્પેય-કાન્તિ-રુચિરા ચિત્રિણી ચિત્રભૂષણા ॥ ૯૬॥

ચિત્તાનન્દકરી ચિત્તા ચિદાનન્દ-સ્વરૂપિણી ।
ચિન્માત્રા ચિતિમધ્યસ્થા ચિરન્તન-શિવપ્રિયા ॥ ૯૭॥

ચિદમ્બર-ચિરાવાસા ચિદ્ઘના ચીર્ણ-સદ્વ્રતા ।
ચીરામ્બરા ચીર્ણતપાઃ ચૂતમૂલ-કૃતાલયા ॥ ૯૮॥

ચૂડા-શશાઙ્કશકલા ચૂર્ણિતાસુર-મસ્તકા ।
ચારીકૃત-મહેશાના ચેટીભૂત-સુરાઙ્ગના ॥ ૯૯॥

ચૈત્યાયતન-મધ્યસ્થા ચૈત્રાદિ-દ્વાદશાભિધા ।
ચોદના ચોરશમની ચોરિતેશ-મહાશયા ॥ ૧૦૦॥

ચૌર્યવિદ્યા ચમત્કારાકારિણી છત્રધારિણી ।
છલાતીતા છદ્મચરા છલિતામર-વૈરિણી ॥ ૧૦૧॥

છિન્નમુણ્ડા છિદચ્છેદ્યા છિન્નપાપ-મહાતરુઃ ।
છિદ્ર-ગોપ્ત્રી છોટમુદ્રા છાયા છન્દોઽધિદેવતા ॥ ૧૦૨॥

છન્દો-માતા જગદ્ધાત્રી જગદાનન્દ-દાયિની ।
જડબુદ્ધિપ્રિયા જન્યા જટામણ્ડલ-મણ્ડિતા ॥ ૧૦૩॥

જનાપવાદશમની જપહોમાર્ચન-પ્રિયા ।
જન્મમૃત્યુ-પ્રશમની જનની જયદાયિની ॥ ૧૦૪॥

જરામરણ-સંહર્ત્રી જલરૂપા જલસ્થિતા ।
જાગરૂકા જાડ્યહન્ત્રી જાતવેદ-કલામયી ॥ ૧૦૫॥

જાતિવ્યક્તિ-ક્રિયાતીતા જાતશાત્રવ-મર્દિની ।
જાતિર્જાયાઽજિતાઽરન્ધ્યા જિતદૈત્યા જિતશ્રમા ॥ ૧૦૬॥

જિહ્વાહસ્તા જીર્ણગરા જીર્ણવિદ્યાપ્રકાશિકા ।
જુહૂર્જુષ્ટાખિલસુખા જૈમિનીયાનુસારિણી ॥ ૧૦૭॥

જમ્ભારિ-નતપાદબ્જા જહ્નુકન્યા-જલપ્રિયા ।
જન્તુકોટિ-મહાબોધ-પ્રદા જમ્બૂવનાશ્રિતા ॥ ૧૦૮॥

જૃમ્ભિકા જૃમ્ભિણી જૃમ્ભા નીલોત્પલવિલોચના ।
જાતરૂપપ્રદા જ્યોતિર્જામદગ્ન્યા જયપ્રદા ॥ ૧૦૯॥

જયશ્રીર્જયિની જેત્રી જગદાનન્દ-વર્ધિની ।
ઝિલ્લી-રણત્-પદયુગા ટઙ્કહસ્તા ડબીજિની ॥ ૧૧૦॥

ડાકિની ડામરમનુર્ડમડ્ડમરુ-નાદિની ।
ઢક્કા-નિનાદ-સન્તુષ્ટા પ્રાણિત્રાણ-પરાયણા ॥ ૧૧૧॥

તન્તુરૂપા તપોરૂપા તલાતલનિવાસિની ।
તરસ્વિની તમોતીતા તલ્પીકૃત-મહેશ્વરા ॥ ૧૧૨॥

ત્વરિતા તામસી તન્ત્રાતન્ત્રિણી તાન્ત્રિકપ્રિયા ।
તમાલ-શ્યામલાકારા તટિદાભા તટાકિની ॥ ૧૧૩॥

તાનવિદ્યા તાલમયી ત્રાસિતાસુર-સૈનિકા ।
ત્રાસાર્દિત-ત્રાણપરા ત્રિનેત્રા વરવર્ણિણી ॥ ૧૧૪॥

ત્રયીવિદ્યા ત્રિધાગ્નિસ્થા ત્રિસર્ગાત્મા કકુદ્મના ।
તિરસ્કરણિકા તીવ્રા તીવ્ર-જ્વાલાદિ-ભીષણા ॥ ૧૧૫॥

તિરશ્ચીનેશ-ગમના તુલાકોટિ-કવણત્પદા ।
તુરીયા તુન્દિલા તુઙ્ગ-પીઠત્રય-નિવાસિની ॥ ૧૧૬॥

તૂણીરિણી તૂર્ણિગમા  તૃણીકૃત-મહાસુરા ।

તૃષ્ણાતીતા ત્રુટિસ્તીક્ષ્ણા તીક્ષ્ણ-બુદ્ધિ-પ્રદાયિની ॥ ૧૧૭॥

તેજસ્વિની તૈલસિક્તા તિલહોમપ્રિયાનના ।
તૈત્તિરીય-મહાવિદ્યા તન્વી તન્તુસ્વરૂપિણી ॥ ૧૧૮॥

તાણ્ડવાડમ્બરનટી તાળરાગ-વિચક્ષણા ।
તમ્બુરાતન્ત્રિ-નિનદાનન્દિની તારનાદિની ॥ ૧૧૯॥

તરુણારુણ-સઙ્કાશા તરુણી તારણક્ષમા ।
નીર-બહુલ-પાથોધિ-સેતુમધ્ય-નિવાસિની ॥ ૧૨૦॥

તામ્બૂલ-વિલસદ્વક્ત્રા તારા-તાટઙ્ક-મણ્ડિતા ।
સ્થાનદા સ્થગિતાऽશેષ-ભુવના  સ્થિતિ-દાયિની ॥ ૧૨૧॥

સ્થાણુપ્રિયા સ્થિરા સ્થૈર્ય-રાશિઃ સ્થલવિશેષિણી ।
સ્થૂલસૂક્ષ્મગતિઃ સ્થાસ્નુ-કીર્તિદા સ્થાવરાકૃતિઃ ॥ ૧૨૨॥

દળિતાશેષ-દનુજા દગ્ધપાપા દમપ્રિયા ।
દર્શનીયા દયાસિન્ધુઃ દત્તસેવ્યા દરીસ્થિતા ॥ ૧૨૩॥

દારિદ્ર્ય-દોષ-શમની દાસીભૂત-જગત્ત્રયા ।
દિગમ્બરપ્રિયા દીપ્તા દીર્ઘનેત્રા દુરાસદા ॥ ૧૨૪॥

દીનબન્ધુર્દીર્ઘકેશી દીપ-માલાન્તર-સ્થિતા ।
દીક્ષા દીક્ષિતસન્તપ્ત-હવ્યભોજન-લાલસા ॥ ૧૨૫॥

દમ્ભાતીત-હૃદાવાસા દન્દશૂકેશ-ધારિણી ।
દંષ્ટ્રા-કરાળ-વદના દણ્ડિતાનન્ત-દાનવા ॥ ૧૨૬॥

દેવારાધ્યા દેવરૂપા દેવારાતિ-નિષૂદિની ।
દેવસ્ત્રી-વન્દિતપદા દૈન્ય-વિધ્વંસ-કારિણી ॥ ૧૨૭॥

દોર્દણ્ડવિધૃતાનેક-હેતિર્દૈત્ય-નિકૃન્તની ।
દોષાપહા દોષદક્ષા દોલા-ખેલન-લાલસા ॥ ૧૨૮॥

દોષાકર-કલાદૃષ્ટા દણ્ડવાદ-નટપ્રિયા ।
ધનુર્વિદ્યા ધનાધ્યક્ષા ધનદા ધર્મવર્ધિની ॥ ૧૨૯॥

ધરા ધવાર્ધ-ચાર્વઙ્ગી ધામદા ધામદુર્જયા ।
ધાતુપુષ્ટિકરી ધાત્રે વરદા ધીરધર્મિણી ॥ ૧૩૦॥

ધુતાળકા ધૂમવતી ધૂળિ-ધૂસરવિગ્રહા ।
ધમ્મિલ્લ-ભાર-રુચિરા ધરાધર-ધનુઃપ્રિયા ॥ ૧૩૧॥

ધરાધરકુલા નષ્ટાધારા ધૈર્ય-પ્રદાયિની ।
ધૂર્જટિ-પ્રિય-સર્વાઙ્ગી ધૂમકેતુ-ભયાપહા ॥ ૧૩૨॥

ધાર્યા ધનાધિપારાધ્યા ધુરીણા ધૃતિરૂપિણી ।
ધૃતાખિલ-જગદ્ભારા દૂર્વારાધ્યા ધૃતિપ્રિયા ॥ ૧૩૩॥

ધારણા ધીર્ધૂતપાપા ધૂમધ્વજ-નિવાસિની ।
નગાત્મજા નતાશેષ-દેવતા નયવર્તિની ॥ ૧૩૪॥

નરમણ્ડલ-સમ્માના નમસ્કાર-સુખપ્રદા ।
નગેન્દ્ર-શિખરારૂઢા નાગરાજોપવીતિની ॥ ૧૩૫॥

નરનારાયણારાધ્યા નાકનાયક-વન્દિતા ।
નારસિંહી નાગકન્યા-નમસ્કૃત-પદામ્બુજા ॥ ૧૩૬॥

નળિનોદર-સઙ્કાશા નગ્નભૈરવ-સેવિતા ।
નટનાથ-પ્રિયા નાટ્ય-નાદજ્ઞા નટનાયિકા ॥ ૧૩૭॥

નાગાભરણ-શોભાઢ્યા નવરત્ન-વિરાજિતા ।
નિમ્નમધ્યા નિજાનન્દા નિતમ્બપ્રથિમાવતી ॥ ૧૩૮॥

નિત્યા નિતાન્ત-સુખદા નિર્વિકારા નિરામયા ।
નિહતાશેષ-પાપૌઘા નિષાદકુલ-તોષદા ॥ ૧૩૯॥

નિગર્ભાદિ-રહસ્યાખ્યા-યોગિની-ગણસેવિતા ।
નામજાતિ-ગુણાતીતા નિર્વિકલ્પા નિરઞ્જના ॥ ૧૪૦॥

નીતિજ્ઞા નિરયચ્છેત્રી નિરાધારા  જનાશ્રિતા ।
નિત્ય-નૈમિત્તિક-પ્રાયશ્ચિત્તોપાસન-સિદ્ધિદા ॥ ૧૪૧॥

નવાવરણ-ચક્રસ્થા નવનાથ-નિષેવિતા ।
નવયૌવન-મધ્યસ્થા નિધિદા નિધિસેવિતા ॥ ૧૪૨॥

નિતાન્ત-નિર્મલ-સ્વાન્ત-નિષેવ્યા નવ્યભવ્યદા ।
નુન્ન-પાપા નુતાગ્નેયા નવનીત-ગુણાન્વિતા ॥ ૧૪૩॥

નયનાનન્દ-જનની નવાર્ણ-મનુ-નાયિકા ।
નૈસર્ગિક-ગુણોપેતા નદીનદજલેસ્થિતા ॥ ૧૪૪॥

નન્દિની નન્દિગા નન્દ-ગોપજા નિર્મલાકૃતિઃ ।
નક્ષત્ર-દેવતા નાક-નાયકાર્ચિત-પાદુકા ॥ ૧૪૫ ॥

નકુલીશ-સમારાધ્યા નિયતાત્મ-સુખપ્રદા ।
નિર્વાણદા નામજાતિ-યોજનાતીત-વિગ્રહા ॥ ૧૪૬ ॥

પવિત્રા પરમાપદ્યા વિદ્યા પર્વતવર્ધિની ।
પરમાપક્ષપાતાઢ્યા પદવી-દર્શકા સતામ્ ॥ ૧૪૭ ॥

પાદસેવા-મોક્ષદાત્રી પાતાળ-તલવાસિની ।
પાપઘ્ની પારદા પારાવાર-મધ્ય-કૃતાલયા ॥ ૧૪૮ ॥

પાલિતાનેક-ભુવના પશુપાશ-વિમોક્ષણી ।
પાખણ્ડ-ખણ્ડિની પાન્થ-રક્ષિકા પતિદેવતા ॥ ૧૪૯ ॥

પાનપાત્રકરા પીતા સુધાપીન-પયોધરા ।
પીયૂષ-વર્ષિણી પીડાહારિણી પિઙ્ગળાકૃતિઃ ॥ ૧૫૦ ॥

પિશાચપતિ-સંસેવ્યા પરાવરવિદાનતા ।
પુણ્યાપુણ્ય-જનારાધ્યા પણિની પુણ્યવર્ધિની ॥ ૧૫૧ ॥

પુરાણપુરુષારાધ્યા પુરુષાર્થ-પ્રદાયિની ।
પૂર્ણામૃતા પૂર્ણસુખા પૂર્ણચન્દ્ર-નિભાનના ॥ ૧૫૨ ॥

પૂર્વર્ષિ-વિદિતા પૂજ્યા પૃતનાપતિ-જન્મભૂઃ ।
પૃથિવ્યાદિ-પ્રસૂવૃત્તા પૂતના-ભીતિ-નાશિની ॥ ૧૫૩ ॥

પ્રસિદ્ધા પ્રાણદા પ્રાંશુઃ પ્રાચીનમુનિ-ભાવિતા ।
પ્રશસ્ત-ભાગ્યદા પ્રાજ્ઞા તૈજસાતીત-રૂપિણી ॥ ૧૫૪ ॥

પ્રેતારૂઢા પાનપરા પુરાણા મધુમોદિતા ।
સ્ફટિકાચ્છ-તનુઃ સ્ફીતા સ્ફાર-સ્ફુરિત-લોચના ॥ ૧૫૫ ॥

સ્ફુટ-પદ્મ-પદ-દ્વન્દ્વા સ્ફોટિતારિ-શિરોઘટા ।
ફલદા ફુલ્લ-પદ્માભા ફણિરાજ-શિરઃસ્થિતા ॥ ૧૫૬ ॥

ફલમૂલકરાફલ્ગુ-ષટ્કાર-મનુ-પલ્લવા ।
બલદા બલિસન્તુષ્ટા બહુશક્તિ-ગણાન્વિતા ॥ ૧૫૭ ॥

બદ્ધ-ચન્દ્રકલા-શીર્ષા બર્બરાળક-મણ્ડિતા ।

બાલગ્રહ-પ્રશમની બાધિતાખિલ-પાતકા ॥ ૧૫૮॥

બાલા બાલકુચદ્વન્દ્વા વટુક-ત્રયસેવિતા ।
બાણહસ્તા બીજરૂપા બિન્દુનાદ-કલાદિકા ॥ ૧૫૯॥

બિમ્બિતાનેક-ભુવના બુદ્ધિદા બુદ્ધિવર્ધિની ।
બુભુક્ષા-શાન્તિજનની બહ્વન્ન-રસ-દાયિની ॥ ૧૬૦॥

બહિષ્કૃત-દુરાચારા બન્ધમોક્ષ-વિધાયિકા ।
બ્રહ્મજ્ઞા બ્રહ્મજનની બ્રહ્મજ્ઞાનૈકકારિણી ॥ ૧૬૧॥

બ્રહ્મકર્મ-પ્રતિષ્ઠાત્રી બ્રાહ્મી બ્રાહ્મણદેવતા ।
બૃહસ્પતિ-સમારાધ્યા બૃહતી બૃહદાકૃતિઃ ॥ ૧૬૨॥

ભગમાલા ભગાકારા ભગગુહ્યા ભગોદરી ।
ભગયોનિર્ભાગ્યદાત્રી ભાલલોચન-મણ્ડિતા ॥ ૧૬૩॥

ભિન્નાસુખા ભૂતધાત્રી ભેરુણ્ડા ભયહારિણી ।
ભૂચક્ર-કોણનિલયા ભૈરવાષ્ટક-સેવિતા ॥ ૧૬૪॥

ભવરોગ-પ્રશમની ભવભૂતિર્ભવપ્રિયા ।
ભિક્ષુકારાધિત-પદા ભિક્ષાદાન-વિશારદા ॥ ૧૬૫॥

ભક્ષ્ય-ભોજ્ય-પ્રિયા ભોક્ત્રી ભાણ્ડીર-ભણિતિ-પ્રિયા ।
ભિદિપાલાયુધા ભ્રાન્તિ-હારિણી ભ્રામરી ભૃગુઃ ॥ ૧૬૬॥

ભ્રમદ્ભ્રમર-ધમ્મિલ્લા ભ્રાજિષ્ણુર્ભોજનપ્રિયા ।
ભાટ્ટદર્શન-સન્તુષ્ટા ભીમભૈરવ-નિસ્વના ॥ ૧૬૭॥

મત્તમાતઙ્ગ-ગમના મધુમત્તા મદોત્કટા ।
મનસ્તોષકરી મન્દહાસા મન્મથમાલિની ॥ ૧૬૮॥

મલઘ્ની મધુરાકારા મનુનીતિ-પ્રકાશિકા ।
માધવાનન્દદા માન્યા માતઙ્ગી માનવર્જિતા ॥ ૧૬૯॥

માલાધરી માતૃરૂપા માલતી-કુસુમપ્રિયા ।
મહિષાન્તકરી માતા માતૃકા-હારધારિણી ॥ ૧૭૦॥

માકન્દ-મઞ્જરીહસ્તા મોહિની માધવાગ્રજા ।
માષાન્નભોક્ત્રી માષાદ-માન્યા માક્ષિક-તર્પણા ॥ ૧૭૧॥

મિથુનીકૃત-રામેશા મિથ્યાજ્ઞાન-વિનાશિની ।
મીનકેતન-વન્દ્યાઙ્ઘ્રિઃ મુનિમાનસ-મોદદા ॥ ૧૭૨॥

મુદાલોકન-સન્તુષ્ટા મુદ્ગરાયુધ-ભીષણા ।
મૂલાધાર-સ્થિતિકરી મૂઢજીવ-પ્રબોધદા ॥ ૧૭૩॥

મેધ્યા મેઘપ્રિયા મેષ-વપાહુતિ-મુદઞ્જિતા ।
મેદિની મોદસન્તુષ્ટા મોદકાહાર-મોદિની ॥ ૧૭૪॥

માયા મન્દારનિલયા મહાવિદ્યેશ્વરી મૃદુઃ ।
યજ્વવિદ્યા યન્ત્રરૂપા યાગસિદ્ધિ-વિધાયિકા ॥ ૧૭૫॥

યાચમાનાર્તિ-શમની યતચિત્ત-કૃપાવતી ।
યવાહુતિપ્રિયા યક્ષ્મ-નાશિની યુક્તશઙ્કરા ॥ ૧૭૬॥

યમબાધા-પ્રશમની યમાદ્યષ્ટાઙ્ગ-યોગદા ।
યોગિવૃન્દપ્રિયા યોગ્યા યુક્ત-સાયક-કાર્મુકા ॥ ૧૭૭॥

યુદ્ધાવની-દુરાધર્ષા યાવકાક્ત-પદામ્બુજા ।
રઘુવંશ-ભવારાધ્યા રામ-કામ-પ્રદાયિની ॥ ૧૭૮॥

રાકેશવદના રાગવતી રમણમૂર્તિષુ ।
રચિતાનેક-ભુવના રણ-કઙ્કટ-દુર્જયા ॥ ૧૭૯॥

રત્ન-કાઞ્ચન-ભૂષાઢ્યા રક્ષોઘ્ની રામસેવિતા ।
રુદ્રાક્ષ-હૃષ્ટા રુદ્રેશા રૂપલાવણ્ય-શાલિની ।
રજતાદ્રિ-કૃતાવાસા રક્ષિતાશેષ-નિર્જરા ॥ ૧૮૦॥

રૌદ્રાસ્ત્રવિદ્યા રમ્ભાદિ-નટીનટન-લમ્પટા ।
લસન્મુખ-મહાપદ્મા લક્ષ્ય-લક્ષણ-વર્જિતા ॥ ૧૮૧॥

લલિતા લઘિમા લક્ષ્મી-દાન-શૌણ્ડા લયપ્રદા ।
લાસ્યતુષ્ટા લતાકારા લાસિની લોલ-લોચના ॥ ૧૮૨॥

લોકાતીતા લોકમાતા લોકાલોકાચલ-સ્થિતા ।
લેલિહાનાગ્ર-રસના લાકિની લુબ્ધકપ્રિયા ॥ ૧૮૩॥

લઙ્કેશ-વધ-સંજ્ઞાતા મહાપાતક-નાશિની ।
વરદા વશ્યકરિણી વાગ્દેવી વિમલાકૃતિઃ ॥ ૧૮૪॥

વર્ધિતાનન્ત-વિભવા વનદુર્ગા વનેચરી ।

વારિરાશિ-તટાવાસા વામા વામાગમ-પ્રિયા ॥ ૧૮૫ ॥

વિશિષ્ટ-પુણ્ય-ફલદા વીતરાગ-મુનિપ્રિયા ।
વિદ્યાવિનોદ-નિપુણા વિચિત્રા વિજયા વિયત્ ॥ ૧૮૬ ॥

વેદાન્તવેદ્યા વૈરાગ્ય-લભ્યા વૈભવદાયિની ।
વીરવેષ્ટિત-પાદાબ્જા વેતાળ-ગણવન્દિતા ॥ ૧૮૭ ॥

શરકાર્મુક-હસ્તાબ્જ-શમિતાસુર-નાયકા ।
શમાદિ-સમ્પદાસાધ્યા શતકોટિ-સ્વરૂપિણી ॥ ૧૮૮ ॥

શાતોદરી શુભાલોકા શુચિઃ શુચિજનપ્રિયા ।
શુદ્ધિપ્રિયા શુદ્ધિદાત્રી શૂલિની શૌર્યશાલિની ॥ ૧૮૯ ॥

શઙ્ખિની શાકિની શોકમોહ-વિધ્વંસ-કારિણી ।
શોચિષ્કેશ-મુખી શોભા શુકશાપ-વિમોચની ॥ ૧૯૦ ॥

શ્રુત્યર્થ-નિપુણારાધ્યા શ્રીપ્રદા શ્રાન્તિ-નાશિની ।
શ્રીકણ્ઠવલ્લભા શ્લાઘ્યા શેષાશેષ-મુખસ્તુતા ॥ ૧૯૧ ॥

શ્રૌતકર્મઠ-પ્રશ્વાસા શૈવ-માર્ગાધિદેવતા ।
ષડાધારાદિ-નિલયા ષડાનન-દયાપરા ॥ ૧૯૨ ॥

ષડૂર્મિરહિતા ષોઢાન્યાસ-સિદ્ધિ-વિધાયિકા ।
ષોડશી ષોડશાકારા વિદ્વદ્-દર્શન-દાયિકા ॥ ૧૯૩ ॥

સર્વલોક-સમારાધ્યા સામગાન-પરાયણા ।
સિદ્ધિઃ સિદ્ધાન્ત-સંવેદ્યા સિદ્ધવિદ્યાધરસ્તુતા ॥ ૧૯૪ ॥

શુમ્ભહન્ત્રી સુખકરી સુરાસુર-નમસ્કૃતા ।
સુલભા સેતુવાસાનાં સેતુરક્ષા-વિધાયિની ॥ ૧૯૫ ॥

સન્દર્શિત-સ્વસ્વરૂપા સંશય-ધ્વંસ-કારિણી ।
સૌન્દર્ય-શાલિની સર્વસૌભાગ્ય-પ્રદ-પાદુકા ॥ ૧૯૬ ॥

હરપ્રિયા હયારૂઢા હાટકોત્તમ-વર્ણિની ।
હલાહલોર્મિ-શમની હિમવત્કુલ-વર્ધિની ॥ ૧૯૭ ॥

હ્રીમતી હેરમ્બમાતા હુઙ્કાર-હત-દાનવા ।
હિરણ્યગર્ભ-પ્રમુખ-પ્રબોધ-સુખદાયિની ॥ ૧૯૮ ॥

ક્ષમાવતી ક્ષુણ્ણદૈત્યા ક્ષુત્તૃણમૃત્યુ-વિનાશિની ।
ક્ષ્વેડોર્મિ-ઘૂર્ણિતેશાન-નિજસ્પર્શ-સુખપ્રદા ॥ ૧૯૯॥

ક્ષાર-દાક્ષિણ-પાથોધિ-સેતુમધ્ય-નિવાસિની ।
ક્ષીણદોષ-જનારાધ્યા દિવ્ય-હાટક-પાદુકા ॥ ૨૦૦॥

શ્રીસૂતઃ
ઇત્યેતૈર્નામભિશ્ચક્રે રામોઽમ્બા-પાદ-પૂજનમ્ ।
તતઃપ્રીતા મહાદેવી રામં પ્રોવાચ પાર્વતી ॥ ૨૦૧॥

તસ્યા મૂર્તેર્વિનિષ્ક્રમ્ય દિવ્ય-વિગ્રહ-ધારિણી ।
પશ્યતાં સર્વદેવાનાં વાનરાણાઞ્ચ પશ્યતામ્ ॥ ૨૦૨॥

શ્રીદેવી -
રામ પ્રીતાસ્મિ તે ભક્ત્યા હેમ-પદ્માર્ચનાદપિ ।
સહસ્રનામ-પાઠેન વરં વૃણુ યદીપ્સસિ ॥ ૨૦૩॥

શ્રીસૂતઃ
તદાશ્ચર્યકરં દૃષ્ટ્વા રૂપં તસ્યા રઘૂદ્વહઃ ।
ઉવાચ પરયા ભક્ત્યા પ્રણતો દણ્ડવદ્ભુવિ ॥ ૨૦૪॥

શ્રીરામઃ
ધન્યોઽસ્મિ કૃતકૃત્યોઽસ્મિ ગતાઘોઽસ્મિ મહેશ્વરિ ।
અતઃ પરતરઃ કો વા વરસ્ત્વદ્દર્શનાધિકઃ ॥ ૨૦૫॥

તથાપિ પ્રાર્થયે માતઃ લોકોપકૃતયે શિવે ।
વરં ત્વત્તો મહાદેવિ સર્વજીવ-દયાપરે ॥ ૨૦૬॥

યાવચ્ચન્દ્રશ્ચ સૂર્યશ્ચ યાવત્તિષ્ઠતિ મેદિની ।
તાવત્ત્વં મામકે સેતૌ ગન્ધમાદન-મૂર્ધનિ ॥ ૨૦૭॥

નિત્યં સાન્નિહિતા ભૂત્વા હરાઘં સર્વદેહિનામ્ ।
ત્વદ્દર્શનવતામમ્બ વર એષ વૃતો મયા ॥ ૨૦૮॥

શ્રીસૂતઃ
તચ્છ્રુત્વા વચનં તત્ર રાઘવસ્ય મહાત્મનઃ ।
પુનઃ પ્રોવાચ સન્તુષ્ટા રામં પર્વતવર્ધિની ॥ ૨૦૯॥

શ્રીદેવી -

એવમસ્તુ મહાબાહો રાક્ષસેશ-નિકૃન્તન ।
સ્થાસ્યે નિત્યં સન્નિહિતા ગન્ધમાદન-પર્વતે ॥ ૨૧૦॥

મમ પ્રસાદાત્ત્વં ગચ્છ પુરીં પૂર્વજ-પાલિતામ્ ।
અયોધ્યાં વિજયી શ્રીમાન્ પુત્રવાંશ્ચ ભવિષ્યસિ ॥ ૨૧૧॥

એતન્નામ-સહસ્રં મે પઠ નિત્યં સમાહિતઃ ।
તેનાહં તવ દાસ્યામિ સર્વાન્ કામાન્મનોગતાન્ ॥ ૨૧૨॥

વર્ષાણામયુતં સાગ્રં કૃત્વા રાજ્યમકણ્ટકમ્ ।
અનેન વર્ત્મના ગચ્છ વૈકુણ્ઠં સપુરીજનઃ ॥ ૨૧૩॥

એતન્નામ-સહસ્રં મે યઃ પઠિષ્યતિ માનવઃ ।
રામ વક્ષ્યે ફલં તસ્ય શ‍ૃણુ રાક્ષસ-કૃન્તન ॥ ૨૧૪॥

એકા પ્રતિકૃતા યેન યત્રકુત્રાપિ તિષ્ઠતા ।
સેતુસ્નાન-ફલં તસ્ય ભવેત્ પાતક-નાશનમ્ ॥ ૨૧૫॥

દશ પ્રતિકૃતા રામ સેતુયાત્રા ભવેદ્ દૃઢમ્ ।
માસમાત્રં ક્રમેણૈતત્ યઃ પઠેત્સુસમાહિતઃ ॥ ૨૧૬॥

તસ્યાહં સકલાભીષ્ટં ધર્મં કીર્તિઞ્ચ નિર્મલામ્ ।
સેતુવાસં સદાકાલં પ્રદાસ્યે રઘુનન્દન ॥ ૨૧૭॥

ષણ્માસં પાઠતઃ શ્રીમાન્ જાયતે માનવો ભુવિ ।
સેતાવાગત્ય રામેશં માઞ્ચ સંસેવ્ય ભક્તિતઃ ॥ ૨૧૮॥

ધનુષ્કોટૌ નરઃ સ્નાત્વા સન્નિધૌ મમ યઃ પઠેત્ ।
વર્ષમેકં ક્રમેણૈવ પુત્રવાન્ ભવતિ ધ્રુવમ્ ॥ ૨૧૯॥

રોગેભ્યો મુચ્યતે સદ્યઃ કુષ્ઠેભ્યોઽપિ વિમુચ્યતે ।
ઋણ-ત્રય-વિમુક્તસ્સન્ બ્રહ્મભૂયાય કલ્પતે ॥ ૨૨૦॥

સેતૌ ચ યત્ર કુત્રાપિ નિત્યમેતત્પઠન્નરઃ ।
મદ્રૂપી જાયતે રામ નાત્ર કાર્યા વિચારણા ॥ ૨૨૧॥

યસ્તદ્દ્વેષ્ટિ સ મા દ્વેષ્ટિ તત્પ્રિયો યસ્સ મે પ્રિયઃ ।
શત્રવસ્તત્ર કાકુત્સ્થ પ્રળયં યાન્તિ સર્વતઃ ॥ ૨૨૨॥

શાપાનુગ્રહ-સામર્થ્યં તસ્યૈવ ધરણીતલે ।
તસ્માન્નામ સહસ્રં મે રામ ત્વં પઠ સર્વદા ॥ ૨૨૩॥

ન દેયં દુર્જનાયૈતદ્દેયં શિષ્યાય સાધવે ॥ ૨૨૪॥

શ્રી સૂતઃ -
ઇત્યુક્ત્વા રાઘવં દેવી સાક્ષાત્પર્વતવર્ધિની ।
અન્તર્દધે શિલામય્યાં મૂર્તૌ લોકસ્ય પશ્યતઃ ॥ ૨૨૫॥

એતત્પર્વતવર્ધિન્યાઃ પ્રોક્તં નામસહસ્રકમ્ ।
તત્પાઠ-ફલમપ્યુક્તં કિમન્યત્ શ્રોતુમિચ્છત ॥ ૨૨૬॥

ઇતિ શ્રીપાદ્મે પુરાણે શતકોટિ-સંહિતાયાં ઉત્તરખણ્ડે સૂતઋષિસંવાદે તીર્થપ્રશંસાયાં
પર્વતવર્ધિની-સહસ્રનામ-સ્તોત્રકથનન્નામ દ્વિશતૈકાશીતિતમસ્સર્ગઃ ॥

હરિઃ ૐ ।

The sahasranAmastotra is not found in the known
text of padmapurANa although the manuscript says
so. It is possible that it is either wrongly
attributed or was found in some manuscript from
which the linked handwritten text was prepared.
Send any additional information you find elsewhere.

Encoded by Sivakumar Thyagarajan Iyer
Proofread by Sivakumar Thyagarajan Iyer, Rajani Arjun Shankar

*Shri Parvatavardhini Sahasranama Stotram*
pdf was typeset on June 29, 2023

Please send corrections to *sanskrit@cheerful.com*